# shrIdevI khaDgamAlA stotraratnam

# શ્રીદેવી ખડ્ગમાલાસ્તોત્રરત્નમ્

## Document Information

Text title : Khadgamala Stotraratnam

File name : khadgamala.itx

Category : devii, dashamahAvidyA, stotra, devI

Location : doc_devii

Author : Unknown

Transliterated by : Sarada Susarla

Proofread by : Sarada Susarla; Anantanarayanan, Sunder Hattangadi, Ajit Krishnan

Description-comments : Vamakeshvara Tantra

Latest update : September 28, 2011, June 18, 2019

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 3, 2023

*sanskritdocuments.org*

# શ્રીદેવી ખડ્ગમાલાસ્તોત્રરત્નમ્

પ્રાર્થના

હ્રીઙ્કારાનનગર્ભિતાનલશિખાં સૌઃ ક્લીઙ્કુલાં બિભ્રતીં
સૌવર્ણામ્બરધારિણીં વરસુધાધૌતાં ત્રિનેત્રોજ્જ્વલામ્ ।
વન્દે પુસ્તકપાશમઙ્કુશધરાં સ્રગ્ભૂષિતામુજ્જ્વલાં
ત્વાં ગૌરીં ત્રિપુરાં પરાત્પરકલાં શ્રીચક્રસઞ્ચારિણીમ્ ॥

અસ્ય શ્રીશુદ્ધશક્તિમાલામહામન્ત્રસ્ય, ઉપસ્થેન્દ્રિયાધિષ્ઠાયી વરુણાદિત્ય ઋષિઃ દેવી ગાયત્રી છન્દઃ સાત્વિક કકારભટ્ટારકપીઠસ્થિત કામેશ્વરાઙ્કનિલયા મહાકામેશ્વરી શ્રી લલિતા ભટ્ટારિકા દેવતા, ઐં બીજં ક્લીં શક્તિઃ, સૌઃ કીલકં મમ ખડ્ગસિદ્ધ્યર્થે સર્વાભીષ્ટસિદ્ધ્યર્થે જપે વિનિયોગઃ, મૂલમન્ત્રેણ ષડઙ્ગન્યાસં કુર્યાત્ ॥

ધ્યાનમ્

તાદૃશં ખડ્ગમાપ્નોતિ યેન હસ્તસ્થિતેનવૈ
અષ્ટાદશમહાદ્વીપસમ્રાડ્ભોક્તાભવિષ્યતિ

આરક્તાભાંત્રિનેત્રામરુણિમવસનાં રત્નતાટઙ્કરમ્યાં
હસ્તામ્ભોજૈસ્સપાશાઙ્કુશમદનધનુસ્સાયકૈર્વિસ્ફુરન્તીમ્ ।
આપીનોત્તુઙ્ગવક્ષો રુહકલશલુઠત્તારહારોજ્જ્વલાઙ્ગીં
ધ્યાયેદમ્ભોરુહસ્થામરુણિમવસનામીશ્વરીમીશ્વરાણામ્ ॥

લમિત્યાદિપઞ્ચ પૂજાં કુર્યાત્, યથાશક્તિ મૂલમન્ત્રં જપેત્ ।

લં - પૃથિવીતત્ત્વાત્મિકાયૈ શ્રીલલિતાત્રિપુરસુન્દરી પરાભટ્ટારિકાયૈ
ગન્ધં પરિકલ્પયામિ - નમઃ
હં - આકાશતત્ત્વાત્મિકાયૈ શ્રીલલિતાત્રિપુરસુન્દરી પરાભટ્ટારિકાયૈ પુષ્પં
પરિકલ્પયામિ - નમઃ
યં - વાયુતત્ત્વાત્મિકાયૈ શ્રીલલિતાત્રિપુરસુન્દરી પરાભટ્ટારિકાયૈ ધૂપં

પરિકલ્પયામિ - નમઃ
રં - તેજસ્તત્ત્વાત્મિકાયૈ શ્રીલલિતાત્રિપુરસુન્દરી પરાભટ્ટારિકાયૈ દીપં
પરિકલ્પયામિ - નમઃ
વં - અમૃતતત્ત્વાત્મિકાયૈ શ્રીલલિતાત્રિપુરસુન્દરી પરાભટ્ટારિકાયૈ
અમૃતનૈવેદ્યં પરિકલ્પયામિ - નમઃ
સં - સર્વતત્ત્વાત્મિકાયૈ શ્રીલલિતાત્રિપુરસુન્દરી પરાભટ્ટારિકાયૈ
તામ્બૂલાદિસર્વોપચારાન્ પરિકલ્પયામિ - નમઃ

શ્રીદેવી સમ્બોધનં - ૧
ૐ ઐં હ્રીં શ્રીં ઐં ક્લીં સૌઃ ૐ નમસ્ત્રિપુરસુન્દરિ,

ન્યાસાઙ્ગદેવતાઃ -૬
હૃદયદેવિ, શિરોદેવિ, શિખાદેવિ, કવચદેવિ, નેત્રદેવિ,
અસ્ત્રદેવિ,

તિથિનિત્યાદેવતાઃ -૧૬
કામેશ્વરિ, ભગમાલિનિ, નિત્યક્લિન્ને, ભેરુણ્ડે, વહ્નિવાસિનિ,
મહાવજ્રેશ્વરિ, શિવદૂતિ, ત્વરિતે, કુલસુન્દરિ, નિત્યે,
નીલપતાકે, વિજયે, સર્વમઙ્ગલે, જ્વાલામાલિનિ, ચિત્રે,
મહાનિત્યે,

દિવ્યૌઘગુરવઃ -૭
પરમેશ્વરપરમેશ્વરિ, મિત્રેશમયિ, ષષ્ઠીશમયિ, ઉડ્ડીશમયિ,
ચર્યાનાથમયિ, લોપામુદ્રામયિ, અગસ્ત્યમયિ,

સિદ્ધૌઘગુરવઃ -૪
કાલતાપશમયિ, ધર્માચાર્યમયિ, મુક્તકેશીશ્વરમયિ, દીપકલાનાથમયિ,

માનવૌઘગુરવઃ -૮
વિષ્ણુદેવમયિ, પ્રભાકરદેવમયિ, તેજોદેવમયિ, મનોજદેવમયિ,
કલ્યાણદેવમયિ, વાસુદેવમયિ, રત્નદેવમયિ, શ્રીરામાનન્દમયિ,

શ્રીચક્ર પ્રથમાવરણદેવતાઃ -૩૨
અણિમાસિદ્ધે, લઘિમાસિદ્ધે, ગરિમાસિદ્ધે, મહિમાસિદ્ધે,
ઇશિત્વસિદ્ધે, વશિત્વસિદ્ધે, પ્રાકામ્યસિદ્ધે, ભુક્તિસિદ્ધે,
ઇચ્છાસિદ્ધે, પ્રાપ્તિસિદ્ધે, સર્વકામસિદ્ધે, બ્રાહ્મિ,
માહેશ્વરિ, કૌમારિ, વૈષ્ણવિ, વારાહિ, માહેન્દ્રિ, ચામુણ્ડે,

મહાલક્ષ્મિ, સર્વસઙ્ક્ષોભિણિ, સર્વવિદ્રાવિણિ, સર્વાકર્ષિણિ,
સર્વવશઙ્કરિ, સર્વોન્માદિનિ, સર્વમહાઙ્કુશે, સર્વખેચરિ,
સર્વબીજે, સર્વયોને, સર્વત્રિખણ્ડે, ત્રૈલોક્યમોહન
ચક્રસ્વામિનિ, પ્રકટયોગિનિ,

શ્રીચક્ર દ્વિતીયાવરણદેવતાઃ -૧૮
કામાકર્ષિણિ, બુદ્ધ્યાકર્ષિણિ, અહંકારાકર્ષિણિ, શબ્દાકર્ષિણિ,
સ્પર્શાકર્ષિણિ, રૂપાકર્ષિણિ, રસાકર્ષિણિ, ગન્ધાકર્ષિણિ,
ચિત્તાકર્ષિણિ, ધૈર્યાકર્ષિણિ, સ્મૃત્યાકર્ષિણિ, નામાકર્ષિણિ,
બીજાકર્ષિણિ, આત્માકર્ષિણિ, અમૃતાકર્ષિણિ, શરીરાકર્ષિણિ,
સર્વાશાપરિપૂરકચક્રસ્વામિનિ, ગુપ્તયોગિનિ,

શ્રીચક્ર તૃતીયાવરણદેવતાઃ -૧૦
અનઙ્ગકુસુમે, અનઙ્ગમેખલે, અનઙ્ગમદને, અનઙ્ગમદનાતુરે,
અનઙ્ગરેખે, અનઙ્ગવેગિનિ, અનઙ્ગાઙ્કુશે, અનઙ્ગમાલિનિ,
સર્વસઙ્ક્ષોભણચક્રસ્વામિનિ, ગુપ્તતરયોગિનિ,

શ્રીચક્ર ચતુર્થાવરણદેવતાઃ -૧૬
સર્વસઙ્ક્ષોભિણિ, સર્વવિદ્રાવિનિ, સર્વાકર્ષિણિ,
સર્વહ્લાદિનિ, સર્વસમ્મોહિનિ, સર્વસ્તમ્ભિનિ, સર્વજૃમ્ભિણિ,
સર્વવશઙ્કરિ, સર્વરઞ્જનિ, સર્વોન્માદિનિ, સર્વાર્થસાધિકે,
સર્વસમ્પત્તિપૂરિણિ, સર્વમન્ત્રમયિ, સર્વદ્વન્દ્વક્ષયઙ્કરિ,
સર્વસૌભાગ્યદાયકચક્રસ્વામિનિ, સમ્પ્રદાયયોગિનિ,

શ્રીચક્ર પઞ્ચમાવરણદેવતાઃ -૧૨
સર્વસિદ્ધિપ્રદે, સર્વસમ્પત્પ્રદે, સર્વપ્રિયઙ્કરિ,
સર્વમઙ્ગલકારિણિ, સર્વકામપ્રદે, સર્વદુઃખવિમોચનિ,
સર્વમૃત્યુપ્રશમનિ, સર્વવિઘ્નનિવારિણિ, સર્વાઙ્ગસુન્દરિ,
સર્વસૌભાગ્યદાયિનિ, સર્વાર્થસાધકચક્રસ્વામિનિ,
કુલોત્તીર્ણયોગિનિ,

શ્રીચક્ર ષષ્ઠાવરણદેવતાઃ -૧૨
સર્વજ્ઞે, સર્વશક્તે, સર્વૈશ્વર્યપ્રદાયિનિ, સર્વજ્ઞાનમયિ,
સર્વવ્યાધિવિનાશિનિ, સર્વાધારસ્વરૂપે, સર્વપાપહરે,
સર્વાનન્દમયી, સર્વરક્ષાસ્વરૂપિણિ, સર્વેપ્સિતફલપ્રદે,

સર્વરક્ષાકરચક્રસ્વામિનિ, નિગર્ભયોગિનિ,

શ્રીચક્ર સપ્તમાવરણદેવતાઃ -૧૦
વશિનિ, કામેશ્વરિ, મોદિનિ, વિમલે, અરુણે, જયિનિ,
સર્વેશ્વરિ, કૌલિનિ, સર્વરોગહરચક્રસ્વામિનિ,
રહસ્યયોગિનિ,

શ્રીચક્ર અષ્ટમાવરણદેવતાઃ -૯
બાણિનિ, ચાપિનિ, પાશિનિ, અઙ્કુશિનિ, મહાકામેશ્વરિ,
મહાવજ્રેશ્વરિ, મહાભગમાલિનિ, સર્વસિદ્ધિપ્રદચક્રસ્વામિનિ,
અતિરહસ્યયોગિનિ,

શ્રીચક્ર નવમાવરણદેવતાઃ -૩
શ્રી શ્રીમહાભટ્ટારિકે, સર્વાનન્દમયચક્રસ્વામિનિ,
પરાપરાતિરહસ્યયોગિનિ,

નવચક્રેશ્વરી નામાનિ -૯
ત્રિપુરે, ત્રિપુરેશિ, ત્રિપુરસુન્દરિ, ત્રિપુરવાસિનિ,
ત્રિપુરાશ્રીઃ, ત્રિપુરમાલિનિ, ત્રિપુરાસિદ્ધે, ત્રિપુરામ્બ,
મહાત્રિપુરસુન્દરિ,

શ્રીદેવી વિશેષણાનિ - નમસ્કારનવાક્ષરીચ -૯
મહામહેશ્વરિ, મહામહારાજ્ઞિ, મહામહાશક્તે, મહામહાગુપ્તે,
મહામહાજ્ઞપ્તે, મહામહાનન્દે, મહામહાસ્કન્ધે, મહામહાશયે,
મહામહા શ્રીચક્રનગરસામ્રાજ્ઞિ, નમસ્તે નમસ્તે નમસ્તે નમઃ ।

ફલશ્રુતિઃ
એષા વિદ્યા મહાસિદ્ધિદાયિની સ્મૃતિમાત્રતઃ ।
અગ્નિવાતમહાક્ષોભે રાજારાષ્ટ્રસ્ય વિપ્લવે ॥

લુણ્ઠને તસ્કરભયે સઙ્ગ્રામે સલિલપ્લવે ।
સમુદ્રયાનવિક્ષોભે ભૂતપ્રેતાદિકે ભયે ॥

અપસ્મારજ્વરવ્યાધિમૃત્યુક્ષામાદિજે ભયે ।
શાકિની પૂતનાયક્ષરક્ષઃકૂષ્માણ્ડજે ભયે ॥

મિત્રભેદે ગ્રહભયે વ્યસનેષ્વાભિચારિકે ।
અન્યેષ્વપિ ચ દોષેષુ માલામન્ત્રં સ્મરેન્નરઃ ॥

સર્વોપદ્રવનિર્મુક્તસ્સાક્ષાચ્છિવમયોભવેત્ ।
આપત્કાલે નિત્યપૂજાં વિસ્તારાત્કર્તુમારભેત્ ॥

એકવારં જપધ્યાનં સર્વપૂજાફલં લભેત્ ।
નવાવર્ણદેવીનાં લલિતાયા મહૌજસઃ ॥

એકત્ર ગણનારૂપો વેદવેદાઙ્ગગોચરઃ ।
સર્વાગમરહસ્યાર્થઃ સ્મરણાત્પાપનાશિની ॥

લલિતાયા મહેશાન્યા માલા વિદ્યા મહીયસિ ।
નરવશ્યં નરેન્દ્રાણાં વશ્યં નારીવશઙ્કરમ્ ॥

અણિમાદિગુણૈશ્વર્યં રઞ્જનં પાપભઞ્જનમ્ ।
તત્તદાવરણસ્થાયિ દેવતાવૃન્દમન્ત્રકમ્ ॥

માલામન્ત્રં પરં ગુહ્યં પરં ધામપ્રકીર્તિતમ્ ।
શક્તિમાલા પઞ્ચધા સ્યાચ્છિવમાલા ચ તાદૃશી ॥

તસ્માદ્ગોપ્યતરાદ્ગોપ્યં રહસ્યં ભુક્તિમુક્તિદમ્ ॥

ઇતિ શ્રીવામકેશ્વરતન્ત્રે ઉમામહેશ્વરસંવાદે
દેવીખડ્ગમાલાસ્તોત્રરત્નં સમાપ્તમ્ ।

Encoded by Sarada Susarla

Proofread by Sarada Susarla; Anantanarayanan, Sunder Hattangadi, Ajit Krishnan

---

*shrIdevI khaDgamAlA stotraratnam*

pdf was typeset on March 3, 2023

Please send corrections to *sanskrit@cheerful.com*